
## एकादशः पाठः

# पृथिव्यां त्रीणि रत्नानि

0672CH11




**पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम्।**
**मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते ।।**



**पदच्छेद:** – पृथिव्यां त्रीणि रत्नानि जलम् अन्नम् सुभाषितं मूढैः पाषाण-खण्डेषु रत्न-संज्ञा विधीयते।

**अन्वय:** – पृथिव्यां जलम् अन्नं सुभाषितम् (इति) त्रीणि रत्नानि (सन्ति)। मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते।

**भावार्थ:** – पृथिव्यां त्रीणि रत्नानि सन्ति। तानि रत्नानि जलम् अन्नं सुभाषितं च भवन्ति। किन्तु मूर्खजनाः तु पाषाणखण्डान् रत्नानि इति वदन्ति।



**अयं निजः परो वेति गणना लघुचेतसाम्।**
**उदारचरितानां तु वसुधैव कुटुम्बकम् ।।**

**पदच्छेद:** – अयं निजः परः वा इति गणना लघुचेतसाम् उदारचरितानां तु वसुधा एव कुटुम्बकम्।

**अन्वय:** – अयं निजः परः वा इति गणना लघुचेतसां (जनानां भवति)। उदारचरितानां (जनानां) तु वसुधा एव कुटुम्बकम् (भवति)।

**भावार्थ:** – एषः स्वजनः अस्ति, एषः च परः जनः अस्ति इति एतादृशं चिन्तनं तु सङ्कुचितभावयुक्तानां जनानां भवति। येषाम् उदारस्वभावः अस्ति तेषां कृते तु सम्पूर्णा पृथ्वी एव परिवारः भवति।

**उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः।**
**न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः।।**




**पदच्छेदः** – उद्यमेन हि सिद्ध्यन्ति कार्याणि न मनोरथैः न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः।

**अन्वयः** – कार्याणि उद्यमेन हि सिद्ध्यन्ति मनोरथैः न (सिद्ध्यन्ति)। (यथा) मृगाः (स्वयं) सुप्तस्य सिंहस्य मुखे न प्रविशन्ति।



**भावार्थः** – वयं यानि कार्याणि कुर्मः तानि केवलम् इच्छया न सिद्ध्यन्ति। कार्यस्य सिद्ध्यर्थं परिश्रमः तु आवश्यकः एव। सिंहः यद्यपि शक्तिमान् भवति तथापि आहारस्य कृते सः अपि परिश्रमं करोति। सुप्तस्य सिंहस्य मुखे मृगाः स्वयम् एव न प्रविशन्ति।

**अभिवादनशीलस्य नित्यं वृद्धोपसेविनः।**
**चत्वारि तस्य वर्धन्ते आयुर्विद्या यशो बलम्।।**




**पदच्छेदः** – अभिवादनशीलस्य नित्यं वृद्धोपसेविनः चत्वारि तस्य वर्धन्ते आयुः विद्या यशः बलम्।

**अन्वयः** – तस्य नित्यम् अभिवादनशीलस्य वृद्धोपसेविनः आयुः विद्या यशः बलम् (च इति) चत्वारि वर्धन्ते।

**भावार्थः** – यः जनः सर्वदा वृद्धानां ज्येष्ठानां च सेवां सम्मानं च करोति, तथा च यः तान् सविनयं प्रणमति, तस्य जनस्य आयुः विद्या यशः बलं च वर्धन्ते।

© NCERT not to be republished

**उद्यमः साहसं धैर्यं बुद्धिः शक्तिः पराक्रमः।**
**षडेते यत्र वर्तन्ते तत्र देवः सहायकृत्॥**



**पदच्छेदः** – उद्यमः साहसं धैर्यं बुद्धिः शक्तिः पराक्रमः षड् एते यत्र वर्तन्ते तत्र देवः सहायकृत्।

**अन्वयः** – यत्र उद्यमः साहसं धैर्यं बुद्धिः शक्तिः पराक्रमः च एते षड् वर्तन्ते तत्र देवः सहायकृत् (भवति)।

**भावार्थः** – यः जनः परिश्रमं करोति, साहसं करोति, धैर्यं धरति, बुद्धेः प्रयोगं करोति, बलशाली वर्तते, पराक्रमी च वर्तते, तस्य कार्ये परमेश्वरः अपि सहायतां करोति।

**विद्या ददाति विनयं विनयाद्याति पात्रताम्।**
**पात्रत्वाद्धनमाप्नोति धनाद्धर्मं ततः सुखम्॥**




**पदच्छेदः** – विद्या ददाति विनयं विनयात् याति पात्रतां पात्रत्वात् धनम् आप्नोति धनात् धर्मम् ततः सुखम्।

**अन्वयः** – विद्या विनयं ददाति, (मनुष्यः) विनयात् पात्रतां याति, पात्रत्वात् धनम् आप्नोति, धनात् धर्मं ततः सुखम् (च आप्नोति)।

**भावार्थः** – विद्या विनयं ददाति, विनयकारणेन जनः योग्यतां प्राप्नोति, योग्यः जनः सरलतया धनम् अर्जयति, धनेन धर्मम् आचरति, धर्मस्य आचरणेन जनः सुखं प्राप्नोति, अतः विद्या अवश्यमेव सुखं ददाति।

© NCERT not to be republished


**अपि स्वर्णमयी लङ्का न मे लक्ष्मण रोचते।**
**जननी जन्मभूमिश्च स्वर्गादपि गरीयसी ।।**



**पदच्छेद:** – अपि स्वर्णमयी लङ्का न मे लक्ष्मण रोचते जननी जन्मभूमि: च स्वर्गात् अपि गरीयसी।

**अन्वय:** – हे लक्ष्मण! स्वर्णमयी अपि लङ्का मे (मह्यं) न रोचते। यतो हि जननी जन्मभूमि: च स्वर्गात् अपि गरीयसी (भवति)।

**भावार्थ:** – श्रीराम: लक्ष्मणं कथयति यत् हे लक्ष्मण! यद्यपि लङ्का स्वर्णमयी अस्ति तथापि लङ्कायां निवास: न मह्यं रोचते, यत: जननी जन्मभूमि: च इति द्वयं स्वर्गात् अपि श्रेष्ठम् अस्ति। अत: मातृभूमौ निवास: उचित:।



**पुस्तकस्था तु या विद्या परहस्तगतं धनम्।**
**कार्यकाले समुत्पन्ने न सा विद्या न तद्धनम् ।।**

**पदच्छेद:** – पुस्तकस्था तु या विद्या परहस्तगतं धनम् कार्यकाले समुत्पन्ने न सा विद्या न तद् धनम्।

**अन्वय:** – पुस्तकस्था तु या विद्या (अस्ति), परहस्तगतं (च यद्) धनम् (अस्ति), (तद् उभयम् अपि) कार्यकाले समुत्पन्ने (सति) – न सा विद्या, न (च) तद् धनम् (स्वस्य उपयोगाय भवति)।

**भावार्थ:** – कस्यचित् समीपे अनेकानि पुस्तकानि सन्ति किन्तु यदि तानि न कदापि पठितानि, तर्हि पुस्तके लिखितं ज्ञानं समागते अवसरे सहायकं न भवति,अपितु बुद्धिस्था विद्या एव कार्यं साधयति। एवमेव अन्येभ्य: प्रदत्तं धनम् अपि समागते अवसरे सहायकं न भवति, स्वहस्ते यत् धनं भवति तदेव धनं कार्यं साधयति इति।



## वयं शब्दार्थान् जानीम:

| शब्द: | अर्थ: | हिन्दी | English | मातृभाषया अर्थं लिखन्तु |
|---|---|---|---|---|
| मूढै: | मूर्खजनै: | मूर्खों के द्वारा | By fools | |
| निज: | स्वकीय: | अपना | Own | |
| पर: | अन्य: जन: | अन्य | Other | |
| लघुचेतसाम् | संकुचितहृदयानाम् | क्षुद्र हृदय वालों का | Of narrow-minded | |
| वसुधा | धरित्री | पृथ्वी | Earth | |
| उद्यमेन | परिश्रमेण | परिश्रम से | Effort | |
| वृद्धोपसेविन: | वृद्धानां सेवकस्य | बुजुर्गों की सेवा करने वाले का | Of the person who serves elders | |
| सहायकृत् | सहायक: | सहायता करने वाला | One who helps | |
| पात्रताम् | योग्यताम् | योग्यता को | Ability | |
| आप्नोति | प्राप्तं करोति | प्राप्त करता है | Receives | |
| गरीयसी | ज्येष्ठा | बड़ी | Great | |
| परहस्तेषु | अन्येषां हस्तेषु | अन्यों के हाथ में | In others hand | |



## वयम् अभ्यासं कुर्म:

१. एतानि सर्वाणि सुभाषितानि उच्चै: पठन्तु स्मरन्तु लिखन्तु च।

२. अधोलिखितानां प्रश्नानाम् उत्तराणि एकपदेन लिखन्तु।

(क) पृथिव्यां कति रत्नानि सन्ति ? – ..............................

(ख) अयं निज: परो वा इति गणना केषां भवति ? – ..............................

(ग) कार्याणि केन सिध्यन्ति ? – ..............................

(घ) विद्या किं ददाति ? – ..............................

(ङ) जननी जन्मभूमिश्च कस्मात् गरीयसी ? – ..............................

(च) लङ्का कीदृशी आसीत् ? – ..............................

© NCERT not to be republished

३. **अधोलिखितानां प्रश्नानाम् एकवाक्येन उत्तराणि लिखन्तु।**

(क) पृथिव्यां त्रीणि रत्नानि कानि सन्ति ?

(ख) उदारचरितानां भाव: क: भवति ?


(ग) मृगा: स्वयमेव कस्य मुखे न प्रविशन्ति ?

(घ) अभिवादनशीलस्य नित्यं कानि वर्धन्ते ?

(ङ) मनुष्य: धनात् किम् आप्नोति ?

(च) उत्पन्नेषु कार्येषु कीदृशं धनम् उपयोगाय न भवति ?

४. **चित्रं दृष्ट्वा वाक्यानि रचयन्तु।**



| | | | |
|---|---|---|---|
| उदाहरणम्- | वृक्ष: फलानि यच्छति। | त्वं फलानि स्वीकरोषि। | अहं फलानि स्वीकरोमि। |
| (क) | ..................। | ..................। | ..................। |
| (ख) | ..................। | ..................। | ..................। |
| (ग) | ..................। | ..................। | ..................। |
| (घ) | ..................। | ..................। | ..................। |
| (ङ) | ..................। | ..................। | ..................। |

© NCERT not to be republished

**५. अधोलिखितानि वाक्यानि पठित्वा 'आम्' अथवा 'न' इति लिखन्तु।**

यथा – किं पृथिव्यां त्रीणि रत्नानि सन्ति ? ......आम्......

(क) त्रीणि रत्नानि जलम् अन्नं पाषाण: च सन्ति ? ....................

(ख) किं धर्मेण सुखं प्राप्यते ? ....................

(ग) किं विद्या विनयं ददाति ? ....................

(घ) किम् अभिवादनशीलस्य विद्या वर्धते ? ....................

(ङ) किम् उद्यमेन कार्याणि नश्यन्ति ? ....................

(च) किं जन्मभूमि: स्वर्गात् गरीयसी भवति ? ....................

**६. चित्रे दर्शितस्य नाम लिङ्गं च निर्दिशन्तु।**

यथा -  ......पुष्पम्...... – ......नपुंसकलिङ्गम्......

 .............................. – ..............................

 .............................. – ..............................

 .............................. – ..............................

 .............................. – ..............................

 .............................. – ..............................

© NCERT not to be republished

७. **वलये पदानि विलिख्य सुभाषितं पूरयन्तु।**

विद्या – ददाति – ............... – विनयात् – ...............

पात्रताम् – ............... – धनम् – ............... – धनात्

............... – ततः – ...............

८. **पट्टिकातः पदानि चित्वा निर्देशानुसारं पदानि लिखन्तु।**

जननी धैर्यम् विद्या विनयः निजः पत्रम् बुद्धिः, मूलम् पराक्रमः शक्तिः धनम् उद्यमः

(क) प्रथमान्त-पुंलिङ्गपदानि सन्ति – 1. ...उद्यमः... 2. ............... 3. ............... 4. ...............

(ख) प्रथमान्त-स्त्रीलिङ्गपदानि सन्ति – 1. ...वसुधा... 2. ............... 3. ............... 4. ...............

(ग) प्रथमान्त-नपुंसकलिङ्गपदानि सन्ति – 1. ...साहसम्... 2. ............... 3. ............... 4. ...............

९. **पाठगतानि सुभाषितानि स्मृत्वा रिक्तस्थानानि पूरयन्तु।**

(क) पृथिव्यां त्रीणि रत्नानि ............................ सुभाषितम्।

(ख) उदारचरितानां तु ............................ कुटुम्बकं भवति।

(ग) उद्यमेन हि ............................ सिद्ध्यन्ति।

(घ) अभिवादनशीलस्य वृद्धोपसेविनः ............................ वर्धन्ते।

© NCERT not to be republished

(ङ) उद्यमः .................................. पराक्रमः।

(च) विद्या .................................. ददाति।

(छ) जननी जन्मभूमिश्च .................................. गरीयसी भवति।


## १०. चित्राणि दृष्ट्वा उचितान् श्लोकांशान् लिखन्तु।



..........................................




..........................................



..................................



..........................................



..........................................

© NCERT not to be republished



## योग्यताविस्तरः

**एतानि सुभाषितानि विविधग्रन्थेभ्यः स्वीकृतानि सन्ति। तेषां ग्रन्थानां परिचयः अत्र वर्णितः अस्ति, यथा-**

(क) चाणक्यनीतिः – एषः एकः नीतिग्रन्थः अस्ति। अस्य रचनाकारः चाणक्यः अस्ति। अस्मिन् ग्रन्थे सूत्ररूपेण धर्म-संस्कृति-न्यायव्यवस्था-शान्ति-सुशिक्षा-इत्यादीनां विषये सुन्दरं विवरणम् अस्ति।

(ख) मनुस्मृतिः – मनुस्मृतिः एकः प्रसिद्धः नीतिग्रन्थः धर्मग्रन्थः च अस्ति। अस्य रचनाकारः महर्षिः मनुः अस्ति। अस्मिन् ग्रन्थे द्वादश अध्यायाः सन्ति। अस्मिन् ग्रन्थे संसारस्य उत्पत्तिः, धर्मः, संस्कृतिः, मनुष्यस्य कर्तव्यानि इत्यादीनां वर्णनम् अस्ति।

(ग) पञ्चतन्त्रम् – पञ्चतन्त्रं कथाग्रन्थः अस्ति। अस्य रचनाकारः पण्डितः विष्णुशर्मा अस्ति। अस्मिन् पञ्च तन्त्राणि सन्ति। मित्रभेदः, मित्रलाभः, काकोलूकीयम्, लब्धप्रणाशः, अपरीक्षितकारकं च।

(घ) हितोपदेशः – हितोपदेशस्य रचनाकारः नारायणपण्डितः अस्ति। अस्मिन् पशु-पक्षिणां कथाभिः बालानां कृते नीतिबोधः प्रस्तुतः अस्ति।

(ङ) रामायणम् – एषः ग्रन्थः भारतीयसंस्कृतेः आदर्शस्वरूपं दर्शयति। रामायणस्य रचयिता महर्षिः वाल्मीकिः अस्ति। अस्मिन् ग्रन्थे भगवतः श्रीरामस्य चरितं वर्णितम् अस्ति। एषः ग्रन्थः आदिकाव्यम् इति नाम्ना प्रसिद्धः अस्ति।

(च) सुभाषितरत्नभाण्डागारः – अस्मिन् ग्रन्थे सुभाषितानां संग्रहः अस्ति। विविध-संस्कृतग्रन्थेभ्यः सुभाषितानि चित्वा अस्मिन् ग्रन्थे तेषां सङ्कलनं कृतम् अस्ति।



## परियोजनाकार्यम्

**१. पाठस्य सर्वाणि सुभाषितानि बृहत्-स्फोरकपत्रे सचित्रं लिखित्वा कक्षायाः भित्तौ स्थापयन्तु।**

**२. सुभाषितेषु प्रयुक्तानां क्रियापदानां सूचीं कुर्वन्तु। तेषाम् आधारेण वाक्यरचनां कुर्वन्तु।**

**३. विद्या, उद्यमः, अभिवादनशीलः, इत्यादिगुणाः येषु सन्ति तादृशानां पञ्चानां महापुरुषाणां जीवनपरिचयं पठन्तु लिखन्तु च।**

**४. "वसुधैव कुटुम्बकम्" इति विषये एकां भाषणप्रतियोगिताम् आयोजयन्तु।**

© NCERT not to be republished